अपि च ।
"न कुर्य्याद्बहुभिः सार्द्धं विरोधं बन्धुभिस्तथा ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥
न्यायमते साध्यव्यापकाभावप्रतियोगित्वम् । इति चिन्तामणिः ॥ साध्यासामानाधिकरण्यम् । इति दीधितिः ॥ * ॥ प्रभवादिषष्टिसंवत्सरान्तर्गतत्रयस्त्रिंशवर्षम् । यथा, भविष्यपुराणे ।
भैरव उवाच ।
"विषमस्थं जगत् सर्व्वं विरोधे भयसंप्लवम् ।
विकारी सर्व्वतोऽपायो मम वाक्यन्तु नान्यथा ॥"
इति ज्योतिस्तत्त्वम् ॥
अनैक्यः । विपरीतार्थः । यथा,—
"श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी ।
अविरोधे सदा कार्य्यं स्मार्त्तं वैदिकवत् सता ॥"
इति स्मृतिः ॥
( नाशः । यथा, महाभारते । ३ । ३०० । ३ ।
"यस्त्वं प्राणविरोधेन कीर्त्तिमिच्छसि शाश्वतीम् ।
सा ते प्राणान् समादाय गमिष्यति न संशयः ॥"
नाटकोक्तप्रतिमुखाङ्गान्यतमः । यथा, साहित्यदर्पणे । ६ । ३५१ ।
"विरोधश्च प्रतिमुखे तथा स्यात् पर्य्युपासनम् ॥"
तल्लक्षणोदाहरणे यथा, तत्रैव । ३५६ ।
"विरोधो व्यसनप्राप्तिः । यथा, चण्डकौशिके राजा । नूनमसमीक्ष्यकारिणा मयान्धेनेव स्फुरच्छिखाकलापो ज्वलनः पद्भ्यां समाक्रान्तः ॥" * ॥ अलङ्कारविशेषः । यथा, साहित्यदर्पणे । १० । ७१८ ।
"क्रियाक्रियाद्रव्याभ्यां यद्द्रव्यं द्रव्येण वा मिथः ।
विरुद्धमिव भासेत विरोधोऽसौ दशाकृतिः ॥")
विरोधनं, क्ली, ( वि + रुध + ल्युट् । ) विरोधः । इत्यमरः ॥ ( यथा, कथासरित्सागरे ।५६।१६६।
"ईदृक्पापफलं पुत्त्र मातापित्रोर्विरोधनम् ॥"
नाशः । यथा, रामायणे । २ । ३६ । २६ ।
"अदुष्टस्य हि संत्यागः सत्पथे निरतस्य च ।
निर्द्दहेदपि शक्रस्य द्युतिं धर्म्मविरोधनात् ॥"
नाटकोक्तविमर्षाङ्गान्यतमः । यथा, साहित्यदर्पणे । ६ । ३७८ ।
"शक्तिः प्रसङ्गः खेदश्च प्रतिषेधो विरोधनम् ॥"
तल्लक्षणादिकं यथा, तत्रैव । ३८७ ।
"कार्य्यात्ययोपगमनं विरोधनमिति स्मृतम् ॥")
विरोधिनी, स्त्री, ( विरुणद्धि या । वि + रुध + णिनि । ङीप् । ) विरोधकारिका । यथा,—
"विरोधं कुरुते चान्या दम्पत्योः प्रीयमाणयोः ।
बधूनां सुहृदां पित्रोः पुत्त्रैः सारमिकैश्च या ।
विरोधिनी सा तद्दत्वा कुर्व्वीत बलिकर्म्मणा ॥"
इति मार्कण्डेयपुराणे दुःसहवंशोत्पत्तिः ॥
विरोधी, [ न् ] पुं, ( विरुणद्धीति । वि + रुध + णिनि । ) शत्रुः । इति हलायुधः ॥ ( यथा, मनुः । ४ । १७ ।
"सर्व्वान् परित्यजेदर्थान् स्वाध्यायस्य विरोधिनः ॥"
विरोधोऽस्यास्मिन्निति । विरोध + इनिः । ) प्रभवादिषष्टिसंवत्सरान्तर्गतत्रयोविंशवर्षम् । यथा, भविष्यपुराणे । भैरव उवाच ।
"अनघिप्रबला लोका धान्यौषधिप्रपीड़नम् ।
जायते मानुषे कष्टं विरोधिनि न संशयः ॥"
इति ज्योतिस्तत्त्वम् ॥
विरोधविशिष्टे, त्रि । ( यथा, कुमारे ।५।१७।
"विरोधिसत्त्वोज्झितपूर्व्वमत्सरं
द्रुमैरभीष्टप्रसवार्च्चितातिथि ॥")
विरोधोक्तिः, स्त्री, ( विरोधस्य उक्तिः । ) परवचनविरोधिवचनम् । तत्पर्य्यायः । विप्रलापः २ विरोधवाक् ३ क्रोधोक्तिः ४ प्रलापः ५ । इति शब्दरत्नावली ॥
विल, श स्तुतौ । इति कविकल्पद्रुमः ॥ ( तुदा०-पर०-सक०-सेट् । ) स्तुतिरिह आच्छादनम् । श, विलति वस्त्रं लोकः परिदधाति इत्यर्थः । वेलिता । अयं केश्चिन्न मन्यते । इति दुर्गादासः ॥
वि(बि)लं, क्ली, (विल + कः ।) छिद्रम् । इत्यमरः ॥ ( यथा, महाभारते । १ । १४६ । १७ ।
"पाण्डवाश्चापि ते सर्व्वे सह मात्रा सुदुःखिताः ।
विलेन तेन निर्गत्य जग्मुर्द्दुतमलक्षिताः ॥")
गुहा । इति मेदिनी ॥ ( यथा, कुमारे । ६ । ३६ ।
"जितसिंहभया नागा यत्राश्वा विलयोनयः ।
यक्षाः किंपुरुषाः पौरा योषितो वनदेवताः ॥")
वि(बि)लः, पुं, उच्चैःश्रवा हयः । इति मेदिनी ॥ वेतसः । इति शब्दचन्द्रिका ॥
वि(बि)लकारी, [न्] पुं, ( विलं करोतीति । कृ + णिनिः ।) मूषकः । इति राजनिर्घण्टः ॥ गर्त्तकारके, त्रि ॥
विलक्षः, त्रि, ( विशेषेण लक्षयतीति । वि + लक्ष + पचाद्यच् । ) विस्मयान्वितः । इत्यमरः ॥ ( यथा, कथासरित्सागरे । ३६ । १५ ।
"इत्युक्ता स विलक्षं तं वैद्यं सूदानृपोऽब्रवीत् ।
किं तस्य च्छगलस्यापि मांसशेषोऽपि कश्चन ॥")
विलक्षणं, क्ली, ( विगतं लक्षणं आलोचनं यत्र ।) हेतुशून्यास्था । निष्प्रयोजनस्थितिः । यथा,—
"विलक्षणं मतं स्थानं यद्भवेन्निष्प्रयोजनम् ॥"
इति भागुरिः । इत्यमरभरतौ ॥
( यथा, भागवते । १० । ७० । ३८ ।
"यद्विद्यमानात्मतयावभासते
तस्मै नमस्ते स्वविलक्षणात्मने ॥ * ॥)
विलक्षणः, त्रि, (विभिन्नं लक्षणं यस्य । ) भिन्नः । इति जटाधरः ॥ (यथा, भागवते ।५ । ६ । ६ ।
"अथैवमखिललोकपालसमो विलक्षणैर्ज्जड़वदभूतवेशभाषाचरितैरविलक्षितभगवत्प्रभाव इति ।" *॥ यथा च भाषापरिच्छेदे । ११४ ।
"अस्मात् पृथगिदं नेति प्रतीतिर्हि विलक्षणा ॥"
विशिष्टं लक्षणं यस्याः । ) विशेषलक्षणयुक्तः । यथा, मत्स्यपुराणे ।
"अशौचान्ताद्द्वितीयेऽह्नि शय्यां दद्याद्विलक्षणाम् ।
काञ्चनं पुरुषं तद्वत् फलपुष्पसमन्वितम् ॥
संपूज्य द्विजदाम्पत्यं नानाभरणभूषणैः ।
वृषोत्सर्गश्च कर्त्तव्यो देया च कपिला शुभा ॥"
द्विजदम्पती पूजयित्वा काञ्चन प्रेतप्रतिकृतिरूपं पुरुषं फलवस्त्रयुतं शय्यायामारोप्य भूषितद्विजदम्पतीभ्यां शय्यां दद्यात् । इति शुद्धितत्त्वम् ॥
विलग्नं, क्ली, (विशेषेण लग्नम् ।) मध्यः । यथा,—
"मध्योऽवलग्नं विलग्नं मध्यमोऽथ कटः कटिः ॥"
इति हेमचन्द्रः ॥
जन्मलग्नम् । यथा,—
"गोचरे वा विलग्ने वा ये ग्रहा रिष्टसूचकाः ।
पूजयेत्तान् प्रयत्नेन पूजिताः स्युः शुभावहाः ॥
गोचरे स्वराश्यपेक्षया यदा कदापि । विलग्ने जन्मलग्ने । इति संस्कारतत्त्वम् ॥ मेषादिलग्नमात्रम् । यथा,—
"शुभग्रहार्कवारे च मृदुक्षिप्रध्रुवेषु च ।
शुभराशिविलग्ने च शुभं शान्तिकपौष्टिकम् ॥"
इति दीपिका ॥
संलग्ने, त्रि । यथा,—
"विलग्नं न स्त्रियां मध्ये त्रिषु स्यात्सम्भमात्रके ॥"
इति मेदिनी ॥
विलज्जः, त्रि, ( विगता लज्जा यस्य । ) लज्जारहितः । निर्लज्जः । यथा,—
"तनयगतदिनेशे शैशवे सौख्यभागी
न भवति फलभागी यौवने व्याधियुक्तः ।
जनयति सुतमेकं निर्द्दयं नाशयित्वा
चपलमतिविलज्जः क्रूरकर्म्मा कुचेलः ॥"
इति ज्योतिषे पञ्चमस्थानस्थरविफलम् ॥
विलपनं, क्ली, ( वि + लप + ल्युट् । ) विलापः । भाषणम् । विपूर्व्वलपधातोः अनट्प्रत्ययेन निष्पन्नम् ॥
विलम्बः, पुं, ( वि + लम्ब + घञ् । ) लम्बनम् । गौणः । यथा, देवीपुराणे ।
"अकालेऽप्यथवा काले तीर्थश्राद्धं तथा नरैः ।
प्राप्तैरेव सदा कार्य्यं कर्त्तव्यं पितृतर्पणम् ॥
पिण्डदानं तत्र शस्तं पितॄणामतिदुर्लभम् ।
विलम्बो नैव कर्त्तव्यो न च विघ्नं समाचरेत् ॥"
इति प्रायश्चित्ततत्त्वम् ॥
प्रभवादिषष्टिसंवत्सरान्तर्गतद्वात्रिंशवर्षम् । यथा, भविष्ये ।
"तस्करैः पार्थिवैश्चैव अभिभूतमिदं जगत् ।
अर्घो भवति सामान्यो विलम्बे तु भयं महत् ॥"
इति ज्योतिस्तत्त्वम् ॥
विलम्बनं, क्ली, ( वि + लम्ब + ल्युट् । ) अशीघ्रम् । इति विलम्बितशब्दटीकायां भरतः ॥ ( यथा, हरिवंशे भविष्यपर्व्वणि । ४१ । २२ ।
"आगच्छ त्वरितं लक्ष्म न ते कार्य्यं विलम्बनम् ॥")
विलम्बितं, त्रि, ( वि + लम्ब + क्तः । ) अशीघ्रम् । इत्यमरे शीघ्रपर्य्यायेऽविलम्बितशब्ददर्शनात् ॥